# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७५

तथोक्तवति रामे तु भरते च महात्मनि ।
लक्ष्मणोऽपि शुभं वाक्यमुवाच रघुनन्दनम् ॥ १॥

अश्वमेधो महायज्ञः पावनः सर्वपाप्मनाम् ।
पावनस्तव दुर्धर्षो रोचतां क्रतुपुङ्गवः ॥ २॥

श्रूयते हि पुरावृत्तं वासवे सुमहात्मनि ।
ब्रह्महत्यावृतः शक्रो हयमेधेन पावितः ॥ ३॥

पुरा किल महाबाहो देवासुरसमागमे ।
वृत्रो नाम महानासीद्दैतेयो लोकसंमतः ॥ ४॥

विस्तीर्णा योजनशतमुच्छ्रितस्त्रिगुणं ततः ।
अनुरागेण लोकांस्त्रीन्स्नेहात्पश्यति सर्वतः ॥ ५॥

धर्मज्ञश्च कृतज्ञश्च बुद्ध्या च परिनिष्ठितः ।
शशास पृथिवीं सर्वां धर्मेण सुसमाहितः ॥ ६॥

तस्मिन्प्रशासति तदा सर्वकामदुघा मही ।
रसवन्ति प्रसूतानि मूलानि च फलानि च ॥ ७॥

अकृष्टपच्या पृथिवी सुसम्पन्ना महात्मनः ।
स राज्यं तादृशं भुङ्क्ते स्फीतमद्भुतदर्शनम् ॥ ८॥

तस्य बुद्धिः समुत्पन्ना तपः कुर्याम् अनुत्तमम् ।
तपो हि परमं श्रेयस्तपो हि परमं सुखम् ॥ ९॥

स निक्षिप्य सुतं ज्येष्ठं पौरेषु परमेश्वरम् ।
तप उग्रमुपातिष्ठत्तापयन्सर्वदेवताः ॥ १०॥

तपस्तप्यति वृत्रे तु वासवः परमार्तवत् ।
विष्णुं समुपसङ्क्रम्य वाक्यमेतदुवाच ह ॥ ११॥

तपस्यता महाबाहो लोका वृत्रेण निर्जिताः ।
बलवान्स हि धर्मात्मा नैनं शक्ष्यामि बाधितुम् ॥ १२॥

यद्यसौ तप आतिष्ठेद्भूय एव सुरेश्वर ।
यावल्लोका धरिष्यन्ति तावदस्य वशानुगाः ॥ १३॥

त्वं चैनं परमोदारमुपेक्षसि महाबल ।
क्षणं हि न भवेद्वृत्रः क्रुद्धे त्वयि सुरेश्वर ॥ १४॥

यदा हि प्रीतिसंयोगं त्वया विष्णो समागतः ।
तदा प्रभृति लोकानां नाथत्वमुपलब्धवान् ॥ १५॥

स त्वं प्रसादं लोकानां कुरुष्व सुमहायशः ।
त्वत्कृतेन हि सर्वं स्यात्प्रशान्तमजरं जगत् ॥ १६॥

इमे हि सर्वे विष्णो त्वां निरीक्षन्ते दिवौकसः ।
वृत्रघतेन महता एषां साह्यं कुरुष्व ह ॥ १७॥

त्वया हि नित्यशः साह्यं कृतमेषां महात्मनाम् ।
असह्यमिदमन्येषामगतीनां गतिर्भवान् ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com